## दिनाङ्क :- 22.08.2025

## प्रातः - 06:55

**प्रधानमन्त्री नरेन्द्र मोदी बिहार**

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य बिहार-पश्चिमबंगालयोः यात्रायां भविष्यति । बिहारे श्रीमोदी प्रातः एकादशवादने गयानगरे प्रायः त्रयोदश-सहस्रकोटि-रूप्यकाणां बहुविध-विकास-परियोजनानाम् आधारशिलास्थापनम् उद्घाटनं च करिष्यति। अतःपरं प्रधानमन्त्री द्वयोः रेलयानयोः कृते हरित-ध्वजं प्रदर्श्य सभां सम्बोधयिष्यति। तदनन्तरं सः गंगानद्याः औन्ता-सिमरिया सेतुपरियोजनायाः उद्घाटनं करिष्यति । अयं सेतुः पटना-नगरस्य मोकामा-बेगूसराय-नगरयोः प्रत्यक्षसम्पर्कं प्रदास्यति । प्रधानमन्त्री एन.एच-३१ इत्यस्य राष्ट्रिय-राजमार्गस्य बख्तियारपुरतः मोकामापर्यन्तं चतुष्पथ-खण्डस्य उद्घाटनं अपि करिष्यति । श्रीमोदी बक्सर-ताप-विद्युत्-संयन्त्रस्य उद्घाटनं अपि करिष्यति, येन विद्युत्-उत्पादन-क्षमतायां महती वृद्धिः भविष्यति, ऊर्जा-सुरक्षायां परिष्कारः भविष्यति, क्षेत्रस्य वर्धमानां विद्युत्-आवश्यकतामपि पूरयिष्यति । प्रधानमन्त्री मुजफ्फरपुरे होमी भाभा कैंसर हॉस्पिटल एण्ड रिसर्च सेण्टर इत्यस्य उद्घाटनं अपि करिष्यति। एषा अत्याधुनिकसुविधा बिहारस्य अथ समीपस्थ-राज्याणां, रोगिणां कृते, उन्नतां न्यूनव्ययां च कैंसर-परिचर्याम् दास्यति। श्री मोदी नमामिगङ्गे इत्यस्य अन्तर्गतं निर्मितस्य मुङ्गेर सीवरेज ट्रीटमेण्ट् प्लाण्ट् (एसटीपी) तथा सीवरेज नेटवर्क् इत्यस्य उद्घाटनं करिष्यति । प्रधानमन्त्री अमृतभारत-एक्सप्रेस् इत्यनयोः द्वयोः रेलयानयोः कृते हरितध्वजं प्रदर्शयिष्यति । प्रधानमन्त्री-ग्रामिण-अवास-योजनायाः अन्तर्गतं द्वादश-सहस्र-ग्रामीण-लाभार्थीनां तथा प्रधानमन्त्री-नगर-अवास-योजनायाः-अन्तर्गतं षष्ट्युत्तर-द्विशताधिक-चतुःसहस्र-लाभार्थीनां गृहप्रवेश-समारोहः अपि प्रधानमन्त्रिणा कतिपयेभ्यः लाभार्थिभ्यः प्रतीकात्मकरूपेण कुञ्चिका-समर्पणेन सह भविष्यति ।

अपरत्र पश्चिमबङ्गराज्ये, प्रधानमन्त्री श्रीमोदी अद्य कोलकातानगरे नवनिर्मितखण्डेषु मेट्रोरेलसेवानां कृते ध्वजं प्रदर्शयिष्यति। ततः परं कोलकातानगरे द्विशताधिक-पञ्चसहस्र-कोटिरूप्यकाणां मूल्यस्य अनेक-विकास-परियोजनानां आधारशिलास्थापनं, उद्घाटनं च करिष्यति। सः अवसरे सभामपि सम्बोधयिष्यति ।

**प्रधानमन्त्री -कोलकाता ::**

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान्, यत् पश्चिमबङ्गः उत्सुकतापूर्वकम्, विकासकार्यक्रमस्य कारणात् भाजपादलं प्रति आशापूर्वकं पश्यन् अस्ति । सोशल मीडिया सन्देशे श्रीमोदी अवदत् यत् राज्ये त्रणमूलकाङ्ग्रेसविरुद्धं प्रतिदिनं जनक्रोधः वर्धमानः अस्ति। सः उक्तवान्, यत् सः अद्य कोलकातानगरे कार्यकर्तासभामपि करिष्यति ।

**रेलवे गणपति विशेषः:**

भारतीय रेलवेविभागेन, उत्सवऋतौ भक्तानां यात्रिकाणां च सुचारु-आरामदायक-यात्रां सुनिश्चेतुम्, अशीत्युत्तर-त्रिशत-गणपति-विशेष-रेलयात्राः घोषिताः। रेलमन्त्रालयेन विज्ञप्तौ उक्तं, यत् केन्द्रीयरेलवेविभागः, महाराष्ट्रे कोङ्कनक्षेत्रे च उत्सवस्य महतीं यात्रा-सम्मर्दं मनसि निधाय, सर्वाधिकं षण्णवत्युत्तर-द्विशत-रेल-सेवानां संचालनं करिष्यति ।

**ऑनलाइन-खेल-प्रचार-विनियमाः**

अद्य संसदा राज्यसभायाः अनुमोदनेन सह पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य ऑनलाइन-गेमिंग-प्रचार-वि-नियमन-विधेयकं पारितम् । अनेन विधेयकेन ई-स्पोर्ट्स इति, ऑनलाइन-सोशल-गेम इत्येतयोः प्रचारेण सह ताभ्यां सम्बद्धाः हानिकारक-ऑनलाईन-धनाधारितक्रीडाः, विज्ञापनानि, वित्तीय-व्यवहाराः च निषिद्धाः भविष्यन्ति । विधेयकं प्रस्तावयन् विद्युतीय-सूचना-प्रसारण-मन्त्री श्रीअश्विनीवैष्णवः अवदत्, यत् ऑनलाईन-धनाधारितक्रीडाः जनस्वास्थ्यस्य कृते प्रतिकूलाः अभवन् ।

**भारतीय- ऋतु**

भारतीय- ऋतुविज्ञानविभागेन अद्य अरुणाचलप्रदेश, बिहार, पूर्वराजस्थान, गेंगटिक पश्चिमबङ्ग, गुजरात, झारखण्ड, नागालैण्ड, मणिपुर, मिजोरम, त्रिपुरा, ओडिशा, -उत्तराखण्ड, मध्यप्रदेशेषु पृथक् पृथक्स्थेषु स्थानेषु अतोऽपि अतिवृष्टेः पूर्वानुमानं कृतम् अस्ति । दिल्ली, हरियाणा, चण्डीगढ, जम्मू-कश्मीर, महाराष्ट्र, पञ्जाब, सिक्किम इत्यादीनां भागेषु अपि आगामिषु द्वि-त्रि दिवसेषु अत्यधिकवृष्टिः भवितुं शक्नोति।

**खेलो इण्डिया**

प्रथमवारं खेलो इण्डिया जलक्रीडामहोत्सवः (KIWSF) इत्यस्य आरम्भः जम्मू-कश्मीर-नगरस्य श्रीनगरे अभवत्, यत्र ह्यः सप्तदश-वर्षीयः स्थानीयः शिखरवाला-मोहसिन्-अलि इत्यनेन प्रथमं स्वर्णपदकं प्राप्तम् ।